॥ श्रीः ॥

# ॥ दत्त नवरत्न मालिका ॥

वित्ततर्षरहितैर्मनुजानां
सत्तमैरनिशसेव्यपदाब्जम् ।
चित्तशुद्धिमभिलिप्सुरहं द्राक्
दत्तदेवमनिशं कलयामि ॥ १

कार्तवीर्यगुरुमत्रितनूजं
पादनम्रशिर आहितहस्तम् ।
श्रीदमुख्यहरिदीश्वरपूज्यं
दत्तदेवमनिशं कलयामि ॥ २

नाकनायकसमर्चितपादं
पाकचन्द्रधरमौल्यवतारम् ।
कोकबन्धुसमपेक्ष्यमहस्कं
दत्तदेवमनिशं कलयामि ॥ ३

मूकपङ्गुबधिरादिमलोकान्
लोकतस्तदितरान् विदधानम् ।
एकवस्तुपरिबोधयितारं
दत्तदेवमनिशं कलयामि ॥ ४

योगदानत इहैव हरन्तं
रोगमाशु नमतां भवसंज्ञम् ।
रागमोहसुखवैरिनिवृत्त्यै
दत्तदेवमनिशं कलयामि ॥ ५

जामदग्न्यमुनये त्रिपुराया
ज्ञानखण्डमवबोधितवन्तम् ।
जामिताविदलनं नतपङ्क्तेः
दत्तदेवमनिशं कलयामि ॥ ६

तारकं भवमहाजलराशेः
पूरकं पदनतेप्सितराशेः ।
वारकं कलिमुखोत्थ भयानां
दत्तदेवमनिशं कलयामि ॥ ७

सत्यचित्सुखनिरन्तरसक्त-
स्वान्तमानतजनं विदधानम् ।
श्रान्तलोकततितोषणचन्द्रं
दत्तदेवमनिशं कलयामि ॥ ८

रक्षणाय जगतो धृतदेहं
शिक्षणाय च दुरध्वगतानाम् ।
ऋक्षराजपरिभाविनिटालं
दत्तदेवमनिशं कलयामि ॥ ९

नवरत्नमालिकेयं ग्रथिता
भक्तेन केनचिद्यतिना ।
गुरुवरचरणाब्जयुगे
तन्मोदायार्पिता चिरं जीयात् ॥ १०

इति शृङ्गेरी जगद्गुरु श्रीचन्द्रशेखरभारतीस्वामिभिः विरचिता
दत्तनवरत्नमालिका सम्पूर्णम् ॥